# संस्कृत वार्ताः

दिनाङ्क : 02.10.2026

सायम् - 06:20

अनुवादकौ - मुदितापुरुषोत्तमौ

प्रवाचकः - पुरुषोत्तमशर्मा

आशुलिपिकः - कैलाशः

इयम् आकाशवाणी

सम्प्रतिः वार्ताः श्रूयन्ताम्

प्रवाचकः - पुरुषोत्तमशर्मा

**आदौ मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य भारतीयविमानचालकनेन कैप्टन् स्मित् मच्छार इत्येनन सह दूरभाषमाध्यमेन संवादं कृतवान्। शीघ्रस्वास्थ्यलाभाय शुभकामनाः च अयच्छत्।

- वाणिज्य-उद्योगमन्त्री पीयूषगोयलः अमेरिकादेशस्य मिल्वौकी-नगरे आयोजितस्य जी-विंशति व्यापारमन्त्रिणां सम्मेलनस्य पृथक् फ्रान्स्, कनाडा, सऊदी-अरबिया दक्षिण-कोरिया-देशानां स्वसमकक्षैः सह द्विपक्षीय-वार्ताः अकरोत्।

- कृतज्ञ-राष्ट्रम् अद्य महात्मने गांधी-वर्याय पूर्व-प्रधानमन्त्रिणे लालबहादुर शास्त्रिणे च तयोः जयन्त्यवसरे श्रद्धांजलिं अर्पयति।

- **अपि च,**

एशियन-गेम्स' क्रीडा-महाकुम्भे अद्य भारतीय मुष्टामुष्टिक्रीडकैः मल्लस्पर्धिभिः धनुर्धरैः च षट्स्वर्ण-पदकानि विजितानि। पंचसप्ततिः पदकैः भारतं तालिकायां पंचमस्थाने विद्यते।

## अथ वार्ता: विस्तरणे

### प्रधानमन्त्री स्मित

प्रधानमन्त्री नरेन्द्रमोदी अद्य भारतीयविमानचालकनेन कैप्टन् स्मित् मच्छार इत्येनन सह दूरभाषमाध्यमेन संवादं कृतवान्। सहचालकेन कृतस्य आक्रमणस्य प्रतिरोधं कुर्वता तेन फ्लायदुबई-विमाने दुबईतः तेल-अवीव्-नगरं प्रति गच्छताम् अशीत्यधिकैकशतं यात्रिणां प्राणाः रक्षिताः। कैप्टन् मच्छार इत्येनन प्रधानमन्त्रिणे स्वस्य अनुभवस्य विस्तृतविवरणं दत्तम्। सममेव घटनाक्रमे तस्मै साहस कुतः प्राप्तमिति कथितम्। प्रधानमन्त्री तस्य साहसं प्रशंसितवान्। तस्य शीघ्रस्वास्थ्यलाभाय शुभकामनाः च अयच्छत्। श्रीमोदी अवदत् यत् सम्पूर्णं राष्ट्रं तस्य स्वास्थ्यलाभाय प्रार्थनां करोति। प्रधानमन्त्री अवोचत् यत् "कैप्टन् स्मितः साहसेन यथासमयम् उचितनिर्णयेन क्षमतया धैर्येण च जनानां प्राणान् अरक्षत्।" प्रधानमन्त्री स्मितस्य साहसस्य प्रशंसां कुर्वन् अवदत् यत् देशः गर्वेण वक्तुं शक्नोति यत् भारतीयाः प्राणान् रक्षितुं स्वजीवनं संकटे स्थापयितुं सज्जाः भवन्ति। वार्तालापस्य समये भावुकः स्मितः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी तस्य सर्वाधिकः आदर्शः अस्ति, अथ च प्रधानमन्त्रिणः दूरभाष-संवादं प्रति गौरवानुभूतिः प्रकटिता।

### विमानाक्रमणान्वीक्षणम्

कैप्टन् स्मित मच्छारस्य उपरि आक्रमणस्य अभियुक्तः सहचालकः अबुधाबी-नगरं प्रति स्थानान्तरितः । सऊदी-प्रेस्-एजेन्सी इत्यनेन सऊदी-गृहमन्त्रालयस्य आधिकारिक-स्रोतस्य उद्धरणं कुर्वता सूचितं यत् चिकित्सकीय-अनुमतिं प्राप्य उभौ विमानचालकौ अबुधाबी-नगरात् देशं त्यक्तवन्तौ। अबुधाबीस्थितः भारतीय-दूतावासः ह्यः सूचितवान् यत् कैप्टन् मच्छारः संयुक्त अरब-अमीरात्-देशं प्राप्तः। अथ च स्मितः शीघ्रं अनारोग्यं प्राप्नोति।

**पूर्वप्रधानमन्त्री गान्धी-राजघाटः**

राष्ट्रम् अद्य राष्ट्रपितुः महात्म-गान्धिनः सप्तपंचाशदुत्तर-एकशत-तमजन्मजयन्त्यां तस्मै श्रद्धाञ्जलिं समर्पयति। राष्ट्रियराजधान्यां नवदिल्ल्यां राजघाटस्थले महात्मगांधिन: समाधिस्थले सर्वधर्मप्रार्थनासभा आयोजिता। राष्ट्रपतिः द्रौपदी मुर्मुः प्रातः सर्वधर्मप्रार्थनासभायां भागं गृहीत्वा महात्मगान्धिने समाधौ पुष्पाञ्जलिं समर्पितवती। उपराष्ट्रपतिः सी. पी. राधाकृष्णन: प्रधानमन्त्री नरेन्द्रमोदी च महात्मागान्धिनः समाधौ श्रद्धाञ्जलिं समर्पितवन्तौ। विश्वस्य विभिन्नेषु भागेषु स्थितैः भारतीय-राजनयिकै: अपि अद्य महात्मागान्धिनः जन्मजयन्त्यवसरे सत्यस्य, अहिंसायाः शाश्वतशान्तेः च स्मरणं विधाय पुष्पाञ्जलि: समर्पिता।

**लालबहादुरशास्त्री**

राष्ट्रम् अद्य पूर्वप्रधानमन्त्रिण: लाल बहादुर शास्त्री महोदयस्य द्वाविंशत्युत्तर एकशत-तमजन्मजयन्त्यां तस्मै अपि श्रद्धाञ्जलिं समर्पयति। तस्य जन्म गतशताब्दस्य चतुर्थे वर्षे अक्टूबर-मासस्य द्वितीये दिने उत्तरप्रदेशस्य पण्डितदीनदयाल-उपाध्याय-नगरे अभवत्, यत् पूर्वं मुगलसराय इति नाम्ना प्रसिद्धम् आसीत्। किशोरावस्थायामेव सः भारतीये स्वातन्त्र्यसङ्घर्षे सम्मिलितः अभवत् तथा च एकविंशत्युत्तर नवदशशत-तमे-वर्षे असहयोगान्दोलने भागं गृहीतवान्। स्वातन्त्र्यप्राप्तेः अनन्तरं शास्त्रीमहोदयः उत्तरप्रदेशे ततः परं केन्द्रसर्वकारे च अनेकानि महत्त्वपूर्णपदानि अलङ्कृतवान्। प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः राष्ट्रियराजधान्यां विजयघाटस्थिते स्मारके पूर्वप्रधानमन्त्रिणे लालबहादुरशास्त्रिणे पुष्पाञ्जलिं समर्पितवान्।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यत्समममब्अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटल www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशअपि उपलब्धो भविष्यति।**

**गोयल–जी- विंशति**

वाणिज्य-उद्योगमन्त्री पीयूषगोयलः अमेरिकादेशस्य मिल्वौकी-नगरे आयोजितस्य जी-विंशति व्यापारमन्त्रिणां सम्मेलने फ्रान्स्, कनाडा, सऊदी-अरबिया दक्षिण-कोरिया-देशानां स्वसमकक्षैः सह द्विपक्षीय-वार्ताः अकरोत्। चर्चायाः मुख्यविषयः सम्बन्धितैः देशैः सह द्विपक्षीय-व्यापार-सम्बन्धानां सुदृढीकरणम् आसीत्। फ्रान्सदेशस्य विदेशव्यापार-विषयक-प्रतिनिधिमन्त्रिण निकोलस फोरिसियर् इत्यनेन सह गोयलः व्यापार-निवेशसम्बन्धानां विस्तारस्य उपायान्, भारत-यूरोपीय-संघस्य मुक्तव्यापार-संधे: शीघ्रसम्पादनस्य उपायान्, विनिर्माणम्, यू.पी.आई.-एकीकरणम्, संयुक्त-नवाचार-उपक्रमाः इत्यादिषु क्षेत्रेषु सहयोगस्य गहनतां चर्चितवान्। श्रीगोयलः कनाडादेशस्य अन्तर्राष्ट्रीयव्यापारमन्त्रिण मनिन्दरसिधुः इत्यनेन सह अपि सफलं संवादं वार्तां कृतवान्। उभौ मन्त्रिणौ भारत-कनाडा-व्यापक-आर्थिक-संधेः शीघ्रसम्पादनाय स्वप्रतिबद्धतां पुनः दृढीकृतवन्तौ। मार्चमासे प्रधानमन्त्रिणा नरेन्द्रमोदीना कनाडादेशस्य प्रधानमन्त्रिणा मार्ककार्नी इत्यनेन च आरब्धः अयं प्रकल्प: त्रिंशदुत्तरद्विसहस्रतम-वर्षपर्यन्तं द्वयोः देशयोः द्विपक्षीयव्यापारं पंचाशत अर्बुद अमेरिकी-डॉलर्-पर्यन्तं नेतुम् उद्दिश्यते।

## संयुक्तराष्ट्रम् – भारतम् – जी.ई.सी.-III

संयुक्तराष्ट्रसङ्घेन भारतस्य षडाशीति दशांशोत्तर लक्षकोटि-रूप्यकाणां हरितोर्जस: तृतीयचरणस्य (जीईसी-III) अनुमोदनस्य स्वागतं कृतम्। विद्युत्जाल-सुदृढीकरणं ऊर्जासञ्चय-योजना च देशस्य अर्थव्यवस्थायै महत्त्वपूर्णं लाभं प्रदास्यतः। संयुक्तराष्ट्रसङ्घस्य जलवायु-परिवर्तन-विषयककार्यकारीसचिवः साइमन स्टील् इत्यसौ अवदत् यत् एषः उपक्रमः भारतं वर्धमानस्य नवीकरणीय-ऊर्जासामर्थ्यस्य उपयोगे, वर्धमानानां विद्युत्-आवश्यकतानां पूर्तौ च सौरऊर्जाक्षेत्रे वैश्विकनेतृत्वस्य स्थितेः अधिकं सुदृढीकरणे सहाय्यं करिष्यति।

## पुतिन–मोदी

रूसीराष्ट्रपतिः व्लादिमीर् पुतिन: उक्तवान् यत् यूक्रेन-सङ्घर्षस्य परस्पर-स्वीकार्य-समाधानं प्राप्तुं प्रधानमन्त्रिण: नरेन्द्रमोदिनः अत्युत्तमाः विचाराः सन्ति। श्रीपुतिन: अवदत् यत् श्रीमोदी परस्पर चर्चासमये युद्धसमाप्ति विषयं नियमितरूपेण उत्थापयति। शान्तिपूर्णसमाधाने च रुचिं प्रदर्शयति। स: भारतस्य कूटनीतिकस्थितिं तटस्थां निर्तिं च संघर्ष-समाप्तये प्रयत्नशीलां वर्णितवान्। श्रीमोदी पूर्वमेव प्रतिपादितवान् यत् भारतं दृढतया "शान्तेः पक्षे" अस्ति। संवादस्य कूटनीतेः च प्रति श्रीमोदिनः निरन्तरप्रयत्नाय व्यावहारिकदृष्टिकोणाय च श्रीपुतिन् कृतज्ञतां प्रकटितवान्।

## ऋतुसञ्चत्तिा

ऋतुविभागेन अद्य अरुणाचलप्रदेशे प्रचण्डवृष्टेः पूर्वानुमानं कृतम्। उक्तं यत् आगामिषु चतुर्विंशतिहोरासु पञ्जाब, हरियाणा, राजस्थान, उत्तरप्रदेश-राज्यानां केषुचित् भागेषु गुजरातस्य मध्यप्रदेशस्य च अधिकांशभागेषु दक्षिणपश्चिम-प्रावृट् निवृत्त्यर्थं स्थितिः अनुकूला अस्ति। ऋतुविभागेन उक्तं यत् श्व: यावत् आन्ध्र प्रदेशे, केरले, माहे क्षेत्रे, उपहिमालयीय पश्चिम बंगाले, सिक्किम राज्ये च वज्रपात: विद्युत गर्जनं च संभाव्यते।

## एशियाक्रीडा

एशियन-गेम्स' क्रीडा-महाकुम्भे अद्य भारतीय मुष्टामुष्टिक्रीडकै: मल्लस्पर्धिभि: धनुर्धरैः च षट्स्वर्ण-पदकानि विजितानि। षोडश स्वर्ण पदकानि समेत्य षट्सप्तति: पदकै: भारतं तालिकायां पंचमस्थाने विद्यते।

**॥ इति वार्ता: ॥**